त्रि० । "आहत्य वायुः सकफो धमनीः शब्दवाहिनीः । नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्" अत्रच नान् ईषदर्थे नञ् । तत्र वायोर्बाहुल्ये मूकत्वम् मध्यमत्वे सानुनासिकशब्दकारकता अल्पत्वे गद्गदकारत्वमिति भेदः ।

**मिल** श्लेषे तु०उभ० सक० सेट् । मिलति अमेलीत् अमेलिष्ट कुटादिरयमित्यन्ये तेन अमिलीत् ल्युटि मिलनम् ।

**मिव** सेके भ्वा० पर० सक० सेट् इदित । मिन्वति अमिन्वीत् ।

**मिश** ध्वनौ अक० कोपे सक० भ्वा० पर० सेट् । मेशति अमेशीत् ।

**मिशि**(शी) स्त्री मिश-इन् वा ङीष् । १मधुरिकायां (मौरी) २शतपुष्पायांं, (सुलफा) भरतः ३जटामांस्याञ्च शब्दर० । अत्र पृषो०मिषि मिषी मिसि-मिसी इत्यादयः उक्तार्थेषु । तत्र पाठान्तरम् । [ यति-ते अमिमिश्र(स्र)त् स ।

**मिश्र** (स्र) योजने अद० चु० उभ० सक० सेट् । मिश्र(स्र)

**मिश्र** त्रि० मिश्र अच् ।१संयुते उत्तरपदस्थः २श्रेष्ठार्थे । यथा आर्य्यमिश्राः । ३गजजातिभेदे पु० हेमच० । ४ज्योतिषोक्ते कृत्तिकाविशाखानक्षत्रगणे च पु० । संज्ञायां कन् । ५इन्द्रुयवे जटा० ६औषरलवणे राजनि० ।

**मिश्रकावण** न० मिश्रकनामकं वनं पूर्वदीर्घौ णत्वञ्च । १इन्द्रोद्याने । [कायाम् राजनि० ।

**मिश्रपुष्पा** स्त्री मिश्रं पुष्पं यस्याः अजा० टाप् । मेथि-

**मिश्रवर्ण** न० मिश्रश्चितो वर्णो यस्य । १कृष्णागुरुणि राजनि० २मिश्रितवर्णमात्रे त्रि० । [वार्त्ताक्यां राजनि०

**मिश्रवर्णफला** स्त्री मिश्रवर्णं चित्ररूपान्वितं फलं यस्याः ।

**मिश्रव्यवहार** पु० लीलावत्युक्ते गणनाभेदे ।

**मिश्रिता** स्त्री "मिश्रिता चैव विज्ञेया मिश्रितर्क्षैस्तु संक्रम" इत्युक्ते १कृत्तिकाविशाखानक्षत्रकाले रविसंक्रमणे । २गौरविते न० जटा० ३मिलिते त्रि० ।

**मिश्रेया** स्त्री मिश्र-अच् मिश्रा ईयते ई गतौ यत् एया कर्म० श्रक० । १मधुरिकायां (मौरी) अमरः । २शतपुष्पायाञ्च (सुलफा) राजनि० । [क्ता वेट् ।

**मिष** सेचने भ्वा० पर० सक० सेट् । मेषति अमेषीत् । उदित्

**मिष** पराभिभवेच्छायाम् तु० पर० सक० सेट् । मिषति अमेषीत् मिमेष ।

**मिष** न० मिष-क । १छले २स्पर्द्धने पु० मेदि० ।

**मिषिका** स्त्री० मिषी+स्वार्थे क । जटामांस्याम् शब्दरत्ना० ।

**मिष्ट** त्रि० मिष-क्त । १सिक्ते २स्पर्द्धिते च । ३मधुररसे पु० ४तद्वति त्रि० भावप्र० ।

**मिह** सेचने भ्वा० पर० सक० अनिट् । मेहति अमिक्षत् ।

**मिहिका** स्त्री मिह-क्वुन् अत इत्त्वम् । नीहारे शब्दर० ।

**मिहिर** पु० मिह-किरच् । १सूर्य्ये २अर्कवृक्षे ३वृद्धे मेदि० ४मेघे हेमच० ५वायौ, ६चन्द्रे, विक्रमादित्यसभास्थे नवरत्नमध्यस्थे पण्डितभेदे च शब्दच० । तच्चिन्त्यम् । "धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासः । ख्यातो वराहमिहिरो न्टपतेः सभायां रत्नानि वै वररुचिर्नवविक्रमस्य" ज्योतिर्विदाभरणवाक्ये वराहः मिहिर इत्येव तत्र समासे वराहमिहिर इत्येकः "वराहमिहिरात्मजेन पृथुयशसा" तत्पुत्रकृतषट्पञ्चाशिकायामुक्तेः द्वित्वे वररुचिना सह दशसंख्यापत्तेश्च ।

**मी** वधे दि० आ० सक० अनिट् । मीयते अमेष्ट ।

**मी** वधे क्र्या० उ० सक० सेट् । मीनाति मीनीते अमासीत् अमास्त । ओदित् क्त मीनः ।

**मी** गत्यां मत्याञ्च वा चु० उभ०पक्षे भ्वा०पर० सक० अनिट् । माययति ते मयति अमीमत्-त अमैषीत् ।

**मीढ** त्रि० मिह-क्त । मूत्रिते ।

**मीढुष्टम** पु० मीढुस्+अतिशये तमप् नि० । शिवे ।

**मीढुस्** पु० मिह-क्वसु नि० । शिवे ।

**मीन** पुंस्त्री० मी-नक् ।१मत्स्ये अमरः स्त्रियां ङीष् मेषादितोद्वादशे २राशौ ३भगवदवतारभेदे च पु० ।

**मीनकेतन** पु० मीनः केतनं यस्य । कन्दर्पे अमरः । मीनध्वजादयोप्यत्र । [राजनि० मीनाक्षीत्यादयोऽप्यत्र ।

**मीननेत्रा** स्त्री मीनस्य नेत्रमिव पर्न्थिरस्याः । गण्डदूर्वायां

**मीनाण्डा** स्त्री मीनस्याण्डस्तदाकारा रेणुकाऽस्त्यस्य अच् गौ० ङीष् । शर्करायाम् राजनि० ।

**मीम** शब्दे अक० गतौ सक० भ्वा० पर० सेट् । मीमति अमीमीत् । ऋदित् चङि न ह्रस्वः ।

**मीमांसक** पु० मीमांसां वेत्त्यधीते वा वुन् । १मीमांसाशास्त्रज्ञे २तदध्येतरि च । मान-विचारे स्वार्थे सन् ण्वुल् । ३सिद्धान्तकारके ।

**मीमांसा** स्त्री मान-विचारे स्वार्थे सन् अ । १विचारपूर्वकतत्त्वनिर्णये २तत्प्रतिपादकग्रन्थभेदे च स च ग्रन्थः कर्मब्रह्मविषयभेदेन द्विविधस्तत्र कर्मकाण्डविषयसंशयनिवारको ग्रन्थो जैमिनिप्रणीतः स च पूर्वमीमांसात्वेन प्रसिद्धः ब्रह्मविषयसंशयनिवारकस्तरमः स वेदान्तत्वेन प्रसिद्धः ।

**मील** निमेषे भ्वा० पर० अक० सेट् । मीलति अमीलीत् । ऋदित् चङि वा ह्रस्वः ।